# वाल्मीकिरामायणोक्त राष्ट्रसमृद्धेरपरिहार्यघटकं–राष्ट्रभक्तिः

**डॉ0 संदीपकुमारमिश्रः**
सहायकाचार्यः संस्कृतविभागः
किसानस्नातकोत्तरमहाविद्यालयः बहराइच

***शोध–सार***

*साम्प्रतं देशे भक्ति–भक्त–शब्दावतिशयेन प्रचलितौ स्तः, किन्तु दुर्भाग्यमिदमस्ति यदिमावुत्कृष्टार्थौ शब्दौ केनचिद् व्यक्तिविशेषेण सम्बध्य अनयोरर्थापकर्षस्य अर्थसंकोचस्य च कुत्सितः प्रयासो विधीयते। यथार्थतः भक्तिस्तु मूलतः एका सम्पूर्णविचारधारा, एकासामूहिकी चेतनाऽस्ति। इयमेका ईदृशी भावनास्ति या बहुविधभेदभावान्, दमयित्वा तत्सम्बद्ध जनान् एकसूत्रेण सततं बध्नाति, अपरतश्चतांस्तथाविधजनेभ्यो विश्लेषयति ये तत्कोटौ सन्त्येव नहि। एषैवभक्तिर्यदा जनसमूहस्य पारस्परिक सहयोगाय समुन्नत्यभिलाषया प्रेरित–भूभागाय प्रेमगर्वरूपेण परिणमेत् तदा सा राष्ट्रभक्तिरुच्यते। डॉ. जी. डी. तिवारिमहाभागो राष्ट्रियतां परिभाषमाण आह–'राष्ट्रियता' शब्दो राष्ट्रशब्दस्य भाववाचिका संज्ञाऽस्ति, यस्यार्थः–'जनसमुदायस्य सामूहिकी चेतना' इत्यस्ति। जनसमुदायस्य सामूहिक चेतनायामनेक तत्त्वानि सम्मिलितानि सन्ति–यथा जनसमूहस्य ऐक्य, तस्मिन् जनसमूहे भौगोलिकमैक्यम्, सामूहिक–सुरक्षा भावना, तथा च सर्वसामूहिकजनेषु वैचारिकसाम्यास्तित्वम्। एतादृशैक्य भावसमन्वित जनसमुदायस्य सामूहिक चेतनैव 'राष्ट्रियता'[1]इत्युच्यते। एषैव राष्ट्रियता–भावना राष्ट्रभक्तिरस्ति।स्वकीय–राष्ट्रियभूमिर्जनसमूहः, संस्कृति–सभ्यतेतिहास–धर्म–साहित्य–कला–राजनीति–जीवनदर्शनादीनि प्रति लोकानां मनसि गरिमा–महिम्नोर्य एको नैसर्गिकः स्वाभिमानो जायते तत्सर्वमेव राष्ट्रभक्तिस्वरूपमभिमतम्।एषैव सा भावना यस्या वशीभूताः जनाः स्वराष्ट्रायस्वकीयं सर्वस्वं समर्पयन्ति। इदमविस्मरणीयं रोमांचकारि बलिदानं यथा प्रबलादम्य–भावनया प्रेरितं भवति सा भावना राष्ट्रभक्तिरेवास्ति।अस्मिन् शोधपत्रे राष्ट्रियता का ? राष्ट्रभक्तिः का ? वाल्मीकि रामायणोक्त राष्ट्रभक्तः राजा कथम् भवेत् ? राष्ट्रस्य सुरक्षा कथम् भवेत् ? राष्ट्रभक्तमानवानां स्वसंस्कृतौ स्नेहभावनादि बिन्दुभिः राष्ट्रभक्तिः कथम् देशस्य समृद्धेः हेतोः आवश्यकी ? अयमेव अस्य शोधपत्रस्य विषयास्ति।*

साम्प्रतं राष्ट्रभक्तिपदस्वरूपमेव चिन्तनीयपरिधौ स्थापितं तदा तद् यथार्थ–स्वरूपावबोधाय साहित्यावगाहनमपरिहार्यं भवति। वाल्मीकिरामायणमेकमीदृशमार्षकाव्यमस्ति, यत्र राष्ट्रभक्तिस्वरूपं पदे पदे वैशद्येन प्रतिपादितम्। वाल्मीकिरामायणे वर्णितस्यास्य राष्ट्रभक्तितत्वस्य विवेचनेनास्य स्वरूपविषये लेशमपि संशयावकाशो न भवति। वस्तुतो यावत् स्वदेशनागरिकेषु स्वराष्ट्रं प्रेम न भवेत् तावत् कश्चनापि देशो नोन्नतिं कर्तुमर्हति। राष्ट्रभक्तिविरहित–देशस्य प्रत्येकं नागरिकः सदैव स्वार्थसिद्धि–विलिप्त एव भवति। यत्तु राष्ट्रसमृद्धिर्निःस्वार्थैः लोभमोहासंवृतैः, वसुधैवकुटुम्बकमित्यादर्शसंस्कृति–संरक्षकैरैव भवितुमर्हति। वाल्मीकिः स्वकीयादिकाव्ये राज–प्रजादिसर्वजनेभ्यो राष्ट्रभक्तिमपरिहार्यामवर्णयत्, यतो हि स राष्ट्रप्रेमप्रवणः एव जनः राष्ट्रसमृद्धये सदैव प्रयत्नशीलो भवेत्, तस्य राष्ट्रसंवेदना पर्याप्तरूपेण सर्वदैव जागृताऽप्रमत्ता च भवति। तल्लेखनी प्रजाजनस्थितिवर्णनेनैव स्वराष्ट्रप्रेम प्राकटयत्। स्वकीयराष्ट्रिय भावनां प्रकाशयन् सः प्रजायाः सर्वतोमुखसमृद्धेः, राष्ट्रसुरक्षायाः राष्ट्रियसंस्कृतिसुरक्षाप्रभृति सर्वराष्ट्रियतत्त्वानां सम्यग्वर्णनमकरोत्। प्रजानां स्थितिं वर्णयन् स सन्दिशति यद् राष्ट्रियप्रजा मनोदेह धनादिभिः समृद्धा स्यात्, आत्मनः सम्पत्या सन्तुष्टा भवेत्, दीर्घायुष्मती भवेत्, राजहितैषिणी भवेत्, अप्रमत्तजागृता भवेत्, अरोगिणी, अलुब्धा,

विद्याभूषिता, सदाचारिणी अनीर्ष्या, राजद्रोहहीना च भवेत्–

**तस्मिन् पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः।**
**नरातुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः।।**
**द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः।।**
**स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।**
**दानाध्ययनशीलश्च संयताश्च प्रतिग्रहे।।**

वस्तुतः यस्य देशस्य प्रजा ईदृशैर्गुणैर्भूषिता भवेत् स देशो निश्चितरूपेण समृद्धिमाप्नुयात् किन्त्विमे गुणाः कस्यचिद् देशस्य प्रजासु तदैव समावेष्टुमर्हन्ति यदा तद्देशवासिनः स्वमातृभूमौ अगाधश्रद्धाप्रेमप्रवणाः भवेयुः स्वदेशं प्रत्येव तेषां भक्तिर्भवेत्।

आदिकविरेतदपि चिन्तयति यद् यदि प्रजाः स्वदेशं प्रत्यगाधानुरागवत्यः सन्ति, किन्तु यदि स देशोऽराजकस्तर्हि स देशो नेतृत्त्वाभावे कदाप्युन्नतिं कर्तुं नार्हति। अतः सः मन्यते–देशः अनिवार्यरूपेण राजसनाथो भवेत्। तन्मत्याऽराजक राज्यं द्रुतं विनश्यति–**"अराजकं हि नो राष्ट्रं विनाशं समवाप्नुयात्"।** वाल्मीकिः सन्दिशति–''अराजके देशे मेघाः पृथिव्यां दिव्य जलंन वर्षन्ति, अराजके देशे धनं स्वकीयं न भवति, अराजके राष्ट्रोन्नतिसाधकाः उत्सवा न भवन्ति, कलानां विकासोऽशक्यो भवति तथा चान्य–राष्ट्रहितकारिसंघाः न विकसन्ति, अराजके जनपदे महिलाः असुरक्षिता भवन्ति, धनिकाः सुरक्षिता न भवन्ति, एतादृशेऽराजके देशे अप्राप्त–वस्तुप्राप्तिः, प्राप्तवस्तु–संरक्षा न भवितुम् अर्हति, युद्धे च सैन्यं शत्रूणामाभिमुख्यं नहि करोति। राज्ञोऽभावे राज्ये किमपि वस्तु कस्यापि स्वकीयं न भवति, यथा मत्स्याः अन्योन्यं भक्षयन्ति तथैवाराजके देशे जनाः अन्योन्यं भक्षयन्ति, लुण्ठन्ति, अतः प्रत्येकं राष्ट्रं शासकयुक्तं नृपसनाथमेवानिवार्यतया समृद्धिं प्राप्तुमर्हति, नान्यथा–

**नाराजके जनपदे विद्युन्माली महास्वनः।**
**अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ।।**
**अराजके धनं नास्ति नास्ति भार्याप्यराजके ।**
**इदमत्याहितं चान्यत् कुतः सत्यमराजके ।।**
**नाराजके जनपदे प्रहृष्टनटनर्तकाः ।**
**उत्सवाश्च समाजाश्च वर्धन्ते राष्ट्रवर्धनाः।।**
**नाराजके जनपदे तूद्यानानि समागताः।**
**सायाह्ने क्रीडितुं यान्ति कुमार्यो हेमभूषिताः।।**
**नाराजके जनपदे धनवन्तः सुरक्षिताः।**
**शेरते विवृतद्वाराः कृषिगोरक्षजीविनः।।**
**नाराजके जनपदे योगक्षेमः प्रवर्तते ।**
**न चाप्यराजके सेना शत्रून् विषहते युधि।।**
**नाराजके जनपदे स्वकं भवति कस्यचित्।**
**मत्स्या इव जना नित्यं भक्षयन्ति परस्परम्।।**

ईदृश समृद्धिशालि–राष्ट्रस्य शासको राजाऽपि राष्ट्रं सदैव समुन्नतिमार्गे एव नायको भवेत्। सः राजा देव–पितृ–भृत्य–गुरुजन–वृद्ध–वैद्य–विप्रादि सुजनानां पूजको भवेत्। तस्य राज्ञस्तदभिन्नाः एव शूरवीर–शास्त्रज्ञ–जितेन्द्रिय–कुलीना मन्त्रिणो भवेयुः। ईदृशो मेधावी राजा कार्यसमाप्तिपर्यन्तं तदन्यराजभ्यो गोपायति, अर्थात् स्वकीय–भावि–कार्ययोजनां प्रागेव न विज्ञापयति, स एव राजा देशं प्रगतिपथेऽग्रे नेतुं प्रभवति। राजा योग्यतानुसारमेव मन्त्रिणः कार्येषु नियोक्तव्याः अन्यथा सदैवानर्थानां सम्भावना भवत्येव। स्वदेशोन्नत्यभिलाषिणा राज्ञा कठोरतापूर्वकं करा न ग्राह्याः, स्वकर्मचारिभ्यो निर्धारितं समुचितं वेतनं यथासमयं प्रदातव्यमन्यथा सेवकाः स्वामिभ्यः कुप्यन्ति एतेनापि महाऽनर्थाः सम्भवन्ति। राष्ट्रसमृद्धिं कामयमानेन राज्ञा स्वराष्ट्रनिवासिनः सर्वे जनाः धर्मानुसारं, पालयितव्याः–

**कच्चिद् देवान् पितॄन् भृत्यान् गुरून् पितृसमानपि।**
**वृद्धांश्च तात वैद्यांश्च ब्राह्मणांश्चाभिमन्यसे।।**
**कच्चिदात्मसमाः शूराः श्रुतवन्तो जितेन्द्रियाः।**
**कुलीनाश्चेङ्गितज्ञाश्च कृतास्ते तात मन्त्रिणः।।**
**कच्चिन्नु सुकृतान्येव कृतरूपाणि वा पुनः।**
**विदुस्ते सर्वकार्याणि न कर्त्तव्यानि पार्थिवाः।।**
**कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः।**
**जघन्याश्च जघन्येषु भृत्यास्ते तात योजिताः।।**
**कच्चित् त्वां नावजानन्ति याजकाः पतितं यथा।**
**उग्र प्रतिग्रहीतारं कामयानमिव स्त्रियः।।**
**कच्चिद् बलस्य भक्तं च वेतनं च यथोचितम्।**

**सम्प्राप्तकालं दातव्यं ददासि न विलम्बसे।।**
**कालातिक्रमणे ह्येव भक्तवेतनयोर्भृताः।**
**भर्तुरप्यतिकुप्यन्ति सोऽनर्थः सुमहान् कृतः।।**
**तेषां गुप्तिपरीहारैः कच्चित् ते भरणं कृतम्।**
**रक्ष्या हि राज्ञा धर्मेण सर्वे विषयवासिनः।।**

एतद्विरूद्धाचरणशील राजा, यः प्रकृत्याऽतिक्रूरः, जन–प्रतिकूलाचारी उद्दण्डश्च भवेत्, तेन पालिता प्रजाः राष्ट्रं च सर्वेऽपि तथैव समृद्धिं नहि प्राप्नुवन्ति यथा गृध्रैर्वा वृकैः पालिताः मेषाः। इत्थम् आदिकविर्वाल्मीकिः राष्ट्रोन्नयनाय राज्ञः आवश्यक गुणार्हताः स्वकीये आदिकाव्ये वैशद्यैनावर्णयत्–

**राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर।**
**न चातिप्रतिकूलेन नाविनीतेन राक्षस।।**
**स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावणः**
**रक्ष्यमाणा न वर्धन्ते मेषा गोमायुना यथा।।**

राष्ट्रसुरक्षाविषयेऽपि वाल्मीकेर्लेखनी मौनं न सेवते। स सन्दिशति यत् परितः पर्याप्त–विस्तृतागाधा सजलदुर्गमाः परिखाभवेयुर्या अन्यैरलंघ्याःदुरुहाः भवेयुः। नगरप्रवेशाय निर्मीयमाणानि द्वाराणि दुर्भेद्यानि लौहश्रृंखला बद्धानि भवेयुः। द्वारेषूत्तम–कोटिकायुधानि वा यन्त्राणि प्रयोक्तव्यानि, यैः शत्रु–सैन्यस्य प्रतिरोधः कर्तुं शक्येत, राष्ट्रं परितः स्थाने स्थाने सर्वागं सुरक्षा सैन्यं बहुसंख्यं सततं नियोज्यं, सैन्यमपि पर्याप्तं सुव्यवस्थितं च भवेत्–

**दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम् ।**
**वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा।।**
**कच्चिद् दुर्गाणि सर्वाणि धनधान्यायुधोदकैः।**
**यन्त्रैश्च प्रतिपूर्णानि तथा शिल्पिधनुर्धरैः।।**

राष्ट्र भक्तलोकः स्वदेशसंस्कृतावत्यन्तं स्निह्यति, स सर्वदा स्वदेशसंस्कृतौ स्निह्यति। अतः स्वदेशोन्नत्यभिलाषी सर्वजनः स्वपरम्परारीतिप्रथादीनां सम्पूर्णसंस्कृतेर्वा पूर्णरीत्याऽनुपालनं करोति। आर्षकाव्ये रामायणे वर्णितसंघर्षो व्यक्तिविशेषस्य नहि, अपितु सः संघर्षः द्वयोः संस्कृत्योर्वा द्वयो प्रजात्योः संघर्षोऽस्ति।

अनयोरेकतरार्यसंस्कृतिरपराऽनार्यसंस्कृतिः, एका मानवप्रजातिऽपरा च राक्षसप्रजातिः। उमे अपि स्वसंस्कृतेस्तथास्वराष्ट्रस्य संरक्षणं कामयेते। यतः सर्वजनाः स्वसंस्कृत्या प्रेमकुवन्ति अत एव रावणशूर्पणखा संवादे शूर्पणखा भूयोभूयः एवमुक्त्वा उत्तेजयति यद्रामलक्ष्मणौ मानवजातीयौ स्तः, आर्यसंस्कृतिसम्पन्नौ स्तः राक्षसजातेश्च शत्रू स्तः। रावणस्तस्या वचनैः प्रभावितो भूत्वा राक्षसप्रजातेस्तत्संस्कृतेश्च मानमर्यादोत्थापनाय आर्यसंस्कृति–मानवप्रजात्योवसाय वा विनाशायैव सीताहरणयोजनां साधयति। किन्तु रावणो वस्तुतः राष्ट्रभक्तेर्मूलभावनायाः अतिरेकं करोति। सः राष्ट्रसमृद्धभिलाषिराज्ञो नर्धारित–नियमानामुल्लंघनं करोति, यस्याः परिणतिर्लंकाध्वंसरूपेण प्रकटिता भवति।

एवमेव युद्धकाले मेघनादो विभीषणं स्वीय राक्षसप्रजातेः, राक्षससंस्कृतेः राक्षसवर्गीय–स्वतंत्रयस्य गरिमाणं ख्यापयित्वा ततो निवर्तितुं प्रेरयति–

**न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते।**
**प्रमाणंन च सौदर्यं न धर्मो धर्मदूषण।।**
**यः स्वपक्षं परित्यज्य परपक्षं निषेवते।**
**स स्वपक्षे क्षयं याते पश्चात् तैरेव हन्यते।।**

परन्तु विभीषणो यथार्थतः राष्ट्रभक्त आसीत्। स जानाति स्म यल्लंका समृद्धिः रामेण सन्धिकरणेनैव साध्येत, अत एव स मुहुर्मुहुः रावणं प्रतिबोधयतिसीतां रामाय समर्पयितुं रामेण च सन्धिं विधातुम्। किन्तु मतिभ्रष्टो रावणस्तं तिरस्करोति। इत्थं यदि लंका सन्दर्भे राष्ट्रभक्ति विवेचना क्रियेत तर्हि स्पष्टं सिध्येत यद् यद्यपि ते सर्व एव स्वदेशं प्रीणति तथापि तत्रत्यो राजा तन्मन्त्रिणश्च राष्ट्र–समृद्धेर्मूलतत्त्वं बोद्धमसफला एवासन्। तत्र राष्ट्रापेक्षया व्यक्तिविशेषे एव भक्तेः प्राधान्यं स्पष्टतया दृग्गोचरीभवति। लंकायां त्याग–बलिदान–वैचारिक–साम्यादीनां स्थानं लोभाभिमानच्छलकपटदम्भादयोऽगृह्णन्, यदा च कस्मिंश्चिद् देशे ईदृगविसंगतयो भवेयुस्तथा राष्ट्रापेक्षया व्यक्तिविशेषस्य महत्वं वर्धेत तर्हि निश्चितमेव तद्राष्ट्रसमृद्धिर्बाधिता भवति। तच्च राष्ट्रं पतनाभिमुखमग्रेसरति।

आदिकविरुपजीव्यकाव्यरामायणे राष्ट्रसमृद्धिविषये स्वलेखन्या यान् विविधायामान् प्रास्तौत्। स सर्वमानवान् स्वमातृभूमिप्रेम्णे प्रैरयत्। स स्वीयकाव्यमाध्यमेनेदं स्पष्टमकरोद् यद् यदि देशस्य राजा तत्प्रजाश्च स्वराष्ट्रं प्रति भक्तिं च नाचरन्ति तर्हि तद् राष्ट्रं कदाप्युन्नतिं न कर्तुं प्रभवति। त्यागबलिदानं भक्तेर्मूलमस्ति। अतः सर्वराष्ट्रभक्तैः स्वराष्ट्र समृद्धर्थं त्यागाय बलिदानाय च सन्नद्धैर्भाव्यम्। वस्तुतः देशाय कृतमिदं त्यागबलिदानमेव तेषां सत्यतो राष्ट्रभक्तिस्ति।

**सन्दर्भ ग्रन्थाः**

1. संस्कृत साहित्य में राष्ट्रिय भावना–पृ0 24
2. वा0रा0, बालकाण्डे– 6/6,8,13
3. अयोध्याकाण्डे– 67/8
4. तदेव 67/9,11,15,17,18,24,31
5. तदेव 100/13,15,20,25,28,32,33,48
6. अरण्यकाण्डे–41/11,14
7. बालकाण्डे–5/13,
8. अयोध्याकाण्डे–100/53
9. युद्धकाण्डे–87/12,16